Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

केन्द्र–कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका

SUDHARMA-THE ONLY SAMSKRITHA DAILY

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

सम्पुटः–४७ सञ्चिका – ६२ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे वर्षऋतौ भाद्रपदकृष्ण प्रतिपदादि अमावास्यायां उत्तराफल्गुनीनक्षत्रयुक्तः शुक्रवासरः ३० सप्तम्बरा २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गौर्गर्दभः।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रैः प्रयोगैर्विषं
सर्वस्योषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्॥

## श्रीमान् वेङ्कटनाथार्यः–२

भारतदेशस्येतिहासे दृश्यमानेषु प्रतिभाशालिषु अन्यतमः श्रीमान् वेङ्कटनाथार्यः । अयं वेदान्तदेशिक इति वेदान्ताचार्य इति च प्रथित इति अवोचाम । कालिदासः श्रेष्ठः कविः, उदयनाचार्यः श्रेष्ठस्तार्किकः। किन्तु वेदान्तदेशिकः श्रेष्ठः कविस्तार्किकश्च । अत एवायं कवितार्किकसिंहः इति प्रसिद्धः। अनेन प्रणीतं यादवाभ्युदयम् इति प्रसिद्धं महाकाव्यं नानार्थगर्भितं सहृदयाह्लादकं ललितं च। प्रसिद्धः आलङ्कारिकः अप्पय्यदीक्षितः यादवाभ्युदयस्य व्याख्यायां वदति –

**इत्थं विचिन्त्यास्सर्वत्र भावास्सन्ति पदे पदे ।**
**कवितार्किकसिंहस्य काव्येषु ललितेष्वपि ॥**

इति । एवं वेदान्तदेशिकस्य सङ्कल्पसूर्योदयनाटकं तस्य प्रज्ञां च प्रतिभां च प्रदर्शयति । एवं तेन रचितानि बहूनि स्तोत्राणि तस्य कविहृदयं द्योतयन्ति। यथा –

**हर्तुं कुम्भे विनिहितकरः स्वादु हैयङ्गवीनं**
**दृष्ट्वा दामग्रहणचटुलां मातरं जातरोषाम् ।**
**पायादीषत्प्रचलितपदो नापगच्छन्नतिष्ठन्**
**मिथ्यागोपः सपदिनयने मीलयन् विश्वगोप्ता ॥**

एवं वेदान्तदेशिकस्य व्याकरणज्ञानम् अप्रतिमम् । संस्कृतभाषायाः सौन्दर्यं तस्य पद्येषु विद्योतते । उदाहरणम् –

**वायुर्दोधूयते यद् यदयमुडुगणो बम्भ्रमीति द्रुतं खे**
**तेजो जाज्वल्यते यद् यदपि जलनिधिर्माधवी दोधवीति ।**
**भूर्यद्वा बोभवीति स्थिरचरधृतये तच्चतादृक् च सर्वं**
**स्वायत्ताशेषसर्गस्थितियतनपरब्रह्मलीलोर्मिचक्रम् ॥**

इति एतादृशाय कविश्रेष्ठाय नमोवाकं प्रचक्ष्महे ।

## कीदृशमिदं जगत् ?

यळन्दूरु–अत्र समीपे वर्तते बिळिगिरिरङ्गशैलः। तत्र माता काचित् पुत्रीभ्यां पुत्रेण च सहागत्य बिळिगिरिरङ्गनाथस्य पूजां कृत्वा ततः विषं पीतवती । पुत्रश्च पुत्र्यौ च तथैवाकुर्वन् । विषबाधया वलमानास्ताः दृष्ट्वा जनाः चिकित्सालयम् अनयन् । तासां तिसृणां पुत्रस्य च प्राणान् रक्षितुं वैद्याः प्रयतमानाः सन्ति ।

भाग्यम्मा–भोजणदम्पत्योः द्वे पुत्र्यौ त्रयः पुत्राश्च। पुत्र्योः विवाहः सम्पन्नो नाभवत् । तेन कारणेन पुत्राश्च विवाहं निराकृत्य ब्रह्मचारिण एव स्थिताः। कन्ययोर्विवाहाय बहुधा प्रयत्नाः कृताः। किन्तु सर्वे विफलाः संजाताः। अनेन दुःखेन स्वहत्यायां वयं प्रावर्तामहि इति माता भाग्यम्मा अवदत्। अस्मिन् जगति निष्करुणे एतादृशानि बहूनि कुटुम्बानि भवन्ति ।

पुरा विवाहस्य प्राधान्यम् आसीत् । अपुत्रस्य गतिर्नास्ति इति तदा जना भावयन्ति स्म । किन्तु अधुना सा परिस्थितिर्नास्त । कन्याः यदि विद्यार्जनं कुर्वन्ति, यदि च उद्योगं लब्ध्वा वेतनं सम्पादयन्ति, तर्हि स्वतन्त्रं जीवनं कर्तुम् अर्हन्ति। तादृशीनां स्त्रीणां समाने गौरवं च विद्यते। अतः कयापि कन्यया स्वहत्याप्रयत्नो न करणीयः। विवाहं विनापि सुजीवनं कर्तुं शक्यम्। विवाहं कृतवन्तः सर्वे सुखिन इत्यपि भ्रान्तिः। अतो विवाह एव जीवनस्य परमोद्देश इति भावना त्यक्तव्या ।

## आप्तराष्ट्रस्थानप्रत्यावर्तनम्

नवदिल्ली–पाकिस्थनदेशस्य रहस्य–कुतन्त्रकार्याणि अधुना बहिरागतानि। उग्राततायिनां कुकृत्यानां पाकिस्तानदेशः परोक्ष साहाय्यानि प्रददन् अस्ति। उरिसेना शिबिरम् उपरि कृतमाक्रमणं साक्षिभूतमस्ति। २०१६ गुरुवासरे नवदेहल्यां प्रधानमन्त्रिणः नरेन्द्र मोदिनः नेतृत्वे सचिवसंपुटसभा प्रचलति। पाकिस्थानदेशाय प्रदत्त–माप्तराष्ट्रमिति स्थानं प्रत्यावर्तयितुम् अन्तिमनिर्णयः स्वीकरिष्यते। पाकिस्थानदेशः भयोत्पादकराष्ट्र–मिति घोषयेत इति मित्रराष्ट्रप्रशासकान् भारतप्रशासकाः प्रार्थयामासुः। भारतप्रशासकानाम् अपेक्षां बांग्ल देशप्रशासकाः अङ्गीचक्रुः। ते भारत प्रशासकान् समर्थयामासुः। एतत्सम्बन्धे विश्वसंस्थापदाधि–कारिणः परोक्षं बांग्लादेशप्रशासकाः सूचयामासुः। भारतस्य सहनं नैव परिक्षयेत् नो चेत् परिणामाः भीकरा भविष्यन्तीति अमेरिकादेश–प्रशासकाः पाकिस्थानदेश – प्रशासकान् प्रबोधयामासुः। पाकिस्थानदेशप्रशासकाः नवंबर् ९,१० दिनाङ्कयोः सार्क्संमेळनं करिष्याम एवेति समवोचन्

## सार्कसम्मेळनम् नैव भविता

इस्लामाबाद्–नवम्बरमासे इस्लामाबाद्नगरे १९तमं सार्क्राष्ट्रसम्मेळनं निश्चितमासीत्। परमधुना पाकिस्थान राष्ट्रं भयोत्पादककृत्यानि निर्मूलयितुं विफलं समभवदिति सार्क्संमेळनं नैव भविता । भारतदेशप्रशासका। उरि आक्रमणानन्तरं पाकिस्तानस्य कुकृत्यानि खण्डयितुं सार्क्संमेळनं नैव गमिष्यते इत्यूचुः। अधुना बांग्ला भूतान् आफ्घानिस्तान–नेपालदेशप्रशासका अपि संमेळनं वयं नैव गमिष्याम इत्यवदन्। एतेन नवम्बर १९ सार्क्सम्मेळनं इस्लामाबाद्नगरे नैव भविष्यति। अधुना सार्क् अध्यक्षराष्ट्रस्य नेपालस्य प्रशासका। अन्यत्र स्थले एतत् संमेळनमायोजयितुं प्रयत्न–शीलास्सन्ति । शनिवारे अक्टोबर १ दिनाङ्के निश्चिरूपेण विषयः ज्ञायते। सार्क्राष्ट्रपरिषन्नियमानुसारात् सार्क्प्रतिनिधिराष्ट्रणाम् एकं राष्ट्रं यदि नैव संमेळनं नैव गमिष्यति तदा शृङ्गसभा पुरोगमिष्यति। उत स्थगितं भविष्यति। अधुना चतुरधिकराष्ट्रानि सार्क्शृङ्गसभां नैव गमिष्याम इति अवोचन्। अतः सार्क्संमेळनं स्थगितं भविष्यति ।

## फलपुष्पप्रदर्शनम्

मैसूरु–प्रतिवर्षमिव अस्मिन् वर्षेऽपि नवरात्रोत्सवाङ्गत्वेन मैसूरु नगर्यां फलपुष्पप्रदर्शनम् आयोज–यिष्यते। विविधानि सस्यानि गुल्मानि लताश्च प्रदर्शने वीक्षितुं जनाः शक्ष्यन्ति। फलानि पुष्पाणि शाकानि च प्रदर्शयिष्यन्ते इति ज्ञायते। प्रदर्शनः प्रथमदिनादारभ्य द्वादशतम दिनं यावत् प्रचलिष्वति इति अधिकारिणो अवदत् ।

## दशरात्रोत्सवः आचरिष्यते

मैसूरु–कर्णाटकराज्ये सर्वत्र श्वः आरभ्य दशरात्रोत्सवः आचरिष्यते। उत्सवाय मैसूरुनगरे सकला सिद्धता कृता । गजाः नगरे वर्तन्ते वीथ्योऽलंकृताः। दशरात्रोत्सवस्य उद्घाटनं कर्तुं प्रसिद्धः कविः डा. चन्नवीरकणविः आगतः। बहवः प्रवासिन आगमिष्यन्तीति निरीक्षा वर्तते।

### महामस्तकाभिषेकः

श्रवणबेळ्गोळा–अत्र श्रीगोम्मटेश्वरस्य महामस्तकाभिषेकः अष्टाదशोत्तरसहस्रतमवर्षस्य फेब्रवरी मासे सम्पत्स्यते इति परमपूज्याः जैनमठाध्यक्षाः श्रीचारुकीर्तिभट्टारक स्वामिनः अघोषयन्। एतदर्थं नवदिल्ल्यां विशेषकार्यालयः आरब्धः ।

### श्वः वेदान्ताचार्याणां उत्सवारम्भः

मैसूरु–नगरे श्रीप्रसन्नकृष्णस्वामिनां देवालये आचार्याणां उत्सवारम्भः।

## अङ्कितः विश्वसंस्थाप्रशस्तिम् अलभत

नवदिल्ली–भारतस्य युवा अङ्कित–नामधेयः विश्वसंस्थायाः प्रतिष्ठितां प्रशस्तिम् अलभत। वाणिज्य व्यवस्थापकपदवीधरः असौ एकं महत्कार्यम् अकरोत्। भारते श्रीमतां जनानां विवाहदिसमारम्भेषु महता प्रमाणेन खाद्यपदार्थाः व्यर्थीभवन्ति। ते च बहिः क्षिप्यन्ते। यदि ते खाद्य पदार्थाः निर्धनेभ्यः दीयन्ते तर्हि सहस्राधिकजनानाम् उदरं पूर्येत। एतत् सर्वं मनसि निधाय व्यर्थीभवन्त खाद्यपदार्थं संरक्षितुं पुनः बुभुक्षितेभ्यः प्रदातुं च परियोजनाम् अङ्कितः निरमात्। तत्र यशस्वी भूत्वा अस्याः समस्यायाः परिहारमपि ज्ञातवान् । एतदर्थं सः प्रतिष्ठितम् उद्योगं परित्यज्य फीडिङ्ग इण्डिया इति संस्थामेव आरभत। ''अहं पूर्वं वाणिज्यसंस्थायामः एकस्यां कार्यं कुर्वन् अभूवम् । कस्मिंश्चित् दिने कस्यचित् श्रीमतः गृहे विवाह निमित्तीकृत्य अगमम्। तत्र दशसहस्रात् अपि अधिकजनाः अभ्यागताः आसन्। पञ्चत्रिंशदपि अधिकप्रकाराणि भक्ष्यभोज्यानि सिद्धीकृतानि अवर्तन्त । किम् एते सर्वे आहारपदार्थाः अतिथिभिः भुज्यन्ते वा? इति आश्चर्येण पश्यन् अभवम्। परं तत्र सञ्जात – परिस्थितिम् अवलोक्य आघातः मया अनुभूतः। प्रायशः पञ्चसहस्रात् जनेभ्यः पर्याप्तान् आहारपदार्थान् ते अवकरभाण्डे अक्षिपन्। एषः विचारः मम मनसि महतः चिन्तनस्य आरम्भे कारणमभवत्। अतः मया सेवासंस्था आरब्धा'' इति अङ्कितः स्वकार्यस्य निर्मितम् असूसुचत्। अधुना अनया संस्थया दशलक्षात् अपि अधिकेभ्यः जनेभ्यः भोजनं प्रदीयते। भारतस्य अष्टाविंशतौ नगरेषु संस्था कार्यं निर्वहन्ती अस्ति। द्विसहस्रात् अपि अधिकस्वयंसेवकाः अस्यां सन्ति। एते स्वयं सेवकाः विवाहादिक कार्यक्रमं गत्वा अवशिष्टाहारपदार्थान् सङ्गृह्य। अपेक्षितेभ्यः प्रयच्छन्ति । एतदर्थं बह्वयः योजना। कृताः सन्ति। अतः शीतकयुतवाहनं तैः स्वीकृतमस्ति। अङ्कितः आहारविषये सर्वत्र जागरोत्पादनकार्येऽपि निरतः वर्तते। एतस्य महत्कार्यं पुरस्कृत्य विश्वसंस्था सुस्थिराभिवृद्धये युवनायकत्वम् इत्याख्यां प्रशस्तिम् अङ्किताय प्रायच्छत्। ऐदम्प्राथम्यम् एषा प्रशस्तिर्दीयमानस्ति। एतदर्थं विश्वस्तरस्य सप्तदश जनाः चितास्सन्ति ।